# श्री मारुती स्तोत्रं

नमो वायुपुत्राय भीमरूपाय धीमते |
नमस्ते रामदूताय कामरूपाय श्रीमते || १ ||

मोह शोक विनाशाय सीताशोक विनाशिने |
भगनशोक वनायास्तु दग्ध लङ्काय वाग्मिने || २ ||

गति निर्जित वाताय लक्ष्मण प्राणदाय च |
वनौकसां वरिष्ठाय वशिने वनवासिने || ३ ||

तत्त्वज्ञान सुधासिन्धु निमगनय महीयते |
आञ्जनेयाय शूराय सुग्रीव सचिवाय ते || ४ ||

जन्ममृत्यु भयघनय सर्व क्लेश हराय च |
नेदिष्ठाय प्रेतभूत पिशाच भयहारिणे || ५ ||

यातनानाशनायास्तु नमो मर्कट रूपिणे |
यक्ष राक्षस शार्दूल सर्प वृश्चिक भीहृते || ६ ||

महाबलाय वीराय चिरंजीविन उद्धते |
हारिणे वज्रदेहाय चोल्लङ्घितमहाब्धये || ७ ||

बलिनामग्रगण्याय नमो न: पाहि मारुते |
लाभदोसि त्वमेवाशु हनुमन् राक्षसान्तक || ८ ||

यशो जयं च मे देहि शत्रून् नाशय नाशय |
स्वाश्रिताना मभयदं य एवं स्तौति मारुतिम् || ९ ||

हानि: कुतो भवेत्तस्य सर्वत्र विजयी भवेत् || १० ||

## इति श्री मारुती स्तोत्रं सम्पूर्णं

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133